# Shivena Ribhum Prati Sutropadeshah

# શિવેન ઋભું પ્રતિ સૂત્રોપદેશઃ

## Document Information

Text title : Shivena Ribhum Prati Sutropadeshah

File name : shivenaRRibhuMpratisUtropadeshaH.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 2 | 1-95||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# શિવેન ઋભું પ્રતિ સૂત્રોપદેશઃ

શ્રુણુ પદ્મજસમ્ભૂત મત્તઃ સૂત્રવિધિક્રમમ્ ।
જ્ઞાનોત્પાદકહેતૂનિ શ્રુતિસારાણિ તત્ત્વતઃ ॥ ૨.૧॥

વ્યાસા મન્વન્તરેષુ પ્રતિયુગજનિતાઃ શામ્ભવજ્ઞાનસિદ્ધ્યૈ
ભસ્માભ્યક્તસમસ્તગાત્રનિવહા રુદ્રાક્ષમાલાધરાઃ ।
કૈલાસં સમવાપ્ય શઙ્કરપદધ્યાનેન સૂત્રાણ્યુમા-
કાન્તાત્પ્રાપ્ય વિતન્વતે સ્વકધિયા પ્રામાણ્યવાદાનહો ॥ ૨.૨॥

જિજ્ઞાસ્યં બ્રહ્મ એવેત્યથપદવિદિતૈઃ સાધનપ્રાપ્ત્યુપાયૈ-
ર્યોગૈર્યોગાદ્યુપાયૈર્યમનિયમમહાસાઙ્ખ્યવેદાન્તવાક્યૈઃ ।
શ્રોતવ્યો ભગવાન્ન રૂપગુણતો મન્તવ્ય ઇત્યાહ હિ વે-
દોદ્બોધદવાક્યહેતુકરણૈર્ધ્યેયઃ સ સાક્ષાત્કૃતેઃ ॥ ૨.૩॥

જન્માદ્યસ્ય યતોઽસ્ય ચિત્રજગતો મિથ્યૈવ તત્કારણં
બ્રહ્મ બ્રહ્માત્મનૈવ પ્રકૃતિપરમદો વર્તમાનં વિવર્તેત્ ।
શ્રુત્યા યુક્ત્યા યતો વા ઇતિપદઘટિતો બોધતો વક્તિ શમ્ભું
નાણુઃ કાલવિપાકકર્મજનિતેત્યાચોદના વૈ મૃષા ॥ ૨.૪॥

યોનિઃ શાસ્ત્રસ્ય વેદસ્તદુભયમનનાદ્બ્રહ્મણઃ પ્રત્યભિજ્ઞા
નિઃશ્વાસાદ્વેદજાલં શિવવરવદનાદ્વેધસા પ્રાપ્તમેતત્ ।
તસ્માત્તર્કવિતર્કકર્કશધિયા નાતિક્રમેત્તાં ધિયં
સ્વામ્નાયક્રિયયા તદપ્રકરણે યોનિર્મહેશો ધ્રુવમ્ ॥ ૨.૫॥

તત્ત્વસ્યાપિ સમન્વયાત્શ્રુતિગિરાં વિશ્વેશ્વરે ચોદના
સા ચાનિર્વચનીયતામુપગતા વાચો નિવૃત્તા ઇતિ ।
આત્મૈવૈષ ઇતીવ વાક્યસુવૃતિર્વૃત્તિં વિધત્તે ધિયા
વેદાન્તાદિષુ એક એવ ભગવાનુક્તો મહેશો ધ્રુવમ્ ॥ ૨.૬॥

નાસદ્વા વીક્ષતે યજ્જડમિતિ કરણૈર્ગન્ધરૂપાદિહીનં

શબ્દસ્પર્શાદિહીનં જગદનુગતમપિ તદ્બ્રહ્મ કિંરૂપમીષ્ટે ।
ગૌણં ચેદપિ શબ્દતો જગદિદં યન્નામરૂપાત્મકં
તચ્ચાત્રાવિશદીશ્વરોઽર્થવચસા મોક્ષસ્ય નિષ્ઠાક્રમઃ ॥ ૨.૭॥

હેયત્વાવચનાચ્ચ તચ્છ્રુતિગિરાં સ્થૂલં પ્રદૃષ્ટં ભવેદ્
રૂપં નારૂપતોઽપિ પ્રકરણવચનં વા વિકારઃ કિલેદમ્ ।
સ્વાપ્યાયાદપિ તદ્વદાપિ પરમાનન્દો યદીત્થં પરઃ
સામાન્યાચ્ચ ગતેરથાપ્યનુભવે વિદ્યોતતે શઙ્કરઃ ॥ ૨.૮॥

શ્રુતત્વાદ્વેદાન્તપ્રતિપદવચઃ કારણમુમા-
સનાથો નાથાનાં સ ચ કિલ ન કશ્ચિજ્જનિભવઃ ।
સ એવાનન્દાત્મા શ્રુતિકથિતકોશાદિરહિતો
વિકારપ્રાચુર્યાન્ન હિ ભવતિ કાર્યં ચ કરણમ્ ॥ ૨.૯॥

તદ્ધેતુવ્યપદેશતોઽપિ શિવ એવેતિ ચાનન્દકૃ-
ન્મન્ત્રૈર્વર્ણકૃતક્રમેણ ભગવાન્સત્યાદ્યનન્તોચ્યતે ।
નૈરન્તર્યાનુપપત્તિતોઽપિ સુખિતા ચાનન્દભેદોઽર્થતઃ
કામાચ્ચાનનુભાવતો હૃદિ ભિદા જાયેદ્ભયં સંસૃતેઃ ॥ ૨.૧૦॥

પુચ્છં બ્રહ્મ પ્રતિષ્ઠિતેતિ વચનાચ્છેષી મહેશોઽવ્યયઃ ।
આકાશાન્તરતોઽપિ ભૌતિકહૃદાકાશાત્મતા વાક્યતો
બ્રહ્મૈવ પ્રતિભાતિ ભેદકલને ચાકલ્પના કલ્પતઃ (નલ્પતઃ)॥ ૨।૧૧॥

સુષુપ્ત્યુત્ક્રાન્ત્યોર્વા ન હિ ખલુ ન ભેદઃ પરશિવે
અતોત્થાનં દ્વૈતે ન ભવતિ પરે વૈ વિલયને ।
તદર્હં યત્સૂક્ષ્મં જગદિદમનાકારમરસં
ન ગન્ધં ન સ્પર્શં ભવતિ પરમેશે વિલસિતમ્ ॥ ૨.૧૨॥

અધીનઞ્ચાર્થં તદ્ભવતિ પુનરેવેક્ષણપરં
સ્વતન્ત્રેચ્છા શમ્ભોર્ન ખલુ કરણં કાર્યમપિ ન ॥ ૨.૧૩॥

જ્ઞેયત્વાવચનાચ્ચ શઙ્કર પરાનન્દે પ્રમોદાસ્પદે
પ્રજ્ઞાનં ન હિ કારણં પ્રકૃતિકં પ્રશ્નત્રયસ્યાર્થવત્ ।
ન વિજ્ઞેયં દેહપ્રવિલયશતોત્થાનગણના
સ મૃત્યોર્મૃત્યુસ્તદ્ભવતિ કિલ ભેદેન જગતઃ ॥ ૨.૧૪॥

મહદ્વચ્ચાણીયો ભવતિ ચ સમો લોકસદૃશા

તથા જ્યોતિસ્ત્વેકં પ્રકરણપરં કલ્પિતવતઃ ।
ન સઙ્ખ્યાભેદેન ત્રિભુવનવિભવાદતિકરં
સ્વભાવોઽયં શશ્વન્મુખરયતિ મોદાય જગતામ્ ॥ ૨.૧૫॥

પ્રાણાદુદ્ગતપઞ્ચસઙ્ખ્યજનિતા તદ્વસ્ત્રિવચ્ચ શ્રુતં
તચ્છ્રોત્રં મનસો ન સિદ્ધપરમાનન્દૈકજન્યં મહઃ ।
જ્યોતિષ્કારણદર્શિતે ચ કરણે સત્તા સદિત્યન્વહં
ચાકર્ષા ભવતિ પ્રકર્ષજનિતે ત્વત્તીતિ વાક્યોત્તરમ્ ॥ ૨.૧૬॥

જાગ્રત્ત્વાવચનેન જીવજગતોર્ભેદઃ કથં કથ્યતે
લિઙ્ગં પ્રાણગતં ન ચેશ્વરપરં જ્યોતિઃ કિલૈક્યપ્રદમ્ ।
અન્યાર્થત્વવિવેકતોઽર્થગતિકં ચાકલ્પયદ્વાક્યતઃ ।
પ્રજ્ઞામિત્યપરઃ ક્રમસ્થિતિરસાવન્યો વદન્તં મૃષા ॥ ૨.૧૭॥

પ્રકૃત્યૈવં સિદ્ધં ભવતિ પરમાનન્દવિધુરં
અભિધ્યોપાદેશાદ્ભવતિ ઉભયામ્નાયવચનૈઃ ।
ભવત્યાત્મા કર્તા કૃતિવિરહિતો યોનિરપિ ચ
પ્રતિષ્ઠા નિષ્ઠા ચ ત્રિભુવનગુરુઃ પ્રેમસદનઃ ॥ ૨.૧૮॥

અભિધ્યોપાદેશાત્સ બહુ ભવદીક્ષાદિવશતઃ
સમાસા(ભો)ચોભાભ્યાં પ્રકૃતિજસમામ્નાયવચનાત્ ।
અતો હ્યાત્મા શુદ્ધઃ પ્રકૃતિપરિણામેન જગતાં
મૃદીવ વ્યાપારો ભવતિ પરિણામેષુ ચ શિવઃ ॥ ૨.૧૯॥

આનન્દાભ્યાસયોગાદ્વિકૃતજગદાનન્દજગતો
અતો હેતોર્ધર્મો ન ભવતિ શિવઃ કારણપરઃ ।
હિરણ્યાત્માઽઽદિત્યેઽક્ષિણિ ઉદેતીહ ભગવા-
ન્નતેશ્ચાધારાણાં શ્રવણવચનૈર્ગોપિતધિયઃ ॥ ૨.૨૦॥

ભેદાદિવ્યપદેશતોઽસ્તિ ભગવાનન્યો ભવેત્કિન્તતઃ
આકાશાદિશરીરલિઙ્ગનિયમાદ્વ્યાપ્યં હિ સર્વં તતઃ ।
તજ્જ્યોતિઃ પરમં મહેશ્વરમુમાકાન્તાખ્યશાન્તં મહો
વેદાન્તેષુ નિતાન્તવાક્યકલને છન્દોઽભિધાનાદપિ ॥ ૨.૨૧॥

ભૂતાદિવ્યપદેશતોઽપિ ભગવત્યસ્મિન્મહેશે ધ્રુવં
યસ્માદ્ભૂતવરાણિ જાયત ઇતિ શ્રુત્યાઽસ્ય લેશાંશતઃ ।
વિશ્વં વિશ્વપતેરભૂત્તદુભયં પ્રામાણ્યતો દર્શના-

ત્પ્રાણસ્યાનુગમાત્સ એવ ભગવાન્નાન્યઃ પથા વિદ્યતે ॥ ૨.૨૨॥

ન વક્તુશ્ચાત્મા વૈ સ ખલુ શિવભૂમાદિવિહિતઃ
તથૈવાયુર્દેહે અરનિવહવચ્ચક્રગમહો ।
અદૃશ્યો હ્યાત્મા વૈ સ હિ સુદૃશતઃ શાસ્ત્રનિવહૈઃ
શિવો દેવો વામો મુનિરપિ ચ સાર્વાત્મ્યમભજત્ ॥ ૨.૨૩॥

પ્રસિદ્ધિઃ સર્વત્ર શ્રુતિષુ વિધિવાક્યૈર્ભગવતો
મહાભૂતૈર્જાતં જગદિતિ ચ તજ્જાદિવચનૈઃ ।
અતોઽણીયાઝ્જ્યાયાનપિ દ્વિવિધભેદવ્યપગતા
વિવક્ષા નોઽસ્તીતિ પ્રથયતિ ગુણૈરેવ હિ શિવઃ ॥ ૨.૨૪॥

સમ્ભોગપ્રાપ્તિરેવ પ્રકટજગતઃ કારણતયા
સદા વ્યોમૈવેત્થં ભવતિ હૃદયે સર્વજગતામ્ ।
અતોઽત્તા વૈ શર્વશ્ચરમચરભૂતં જગદિદં
મહામૃત્યુર્દેશો ભવતિ શિખરન્નાદ ઇતિ ચ ॥ ૨.૨૫॥

પ્રકરણવચનેન વેદજાતે ભગવતિ ભવનાશને મહેશે ।
પ્રવિશતિ શિવ એવ ભોગભોક્તૃનિયમનદર્શનતો હિ વાક્યજાતમ્ ॥ ૨.૨૬॥

વિશેષણૈઃ શઙ્કરમેવ નિત્યં દ્વિધા વદત્યેવમુપાધિયોગાત્ ।
અતોઽન્તરા વાક્યપદૈઃ સમર્થિતઃ સ્થાનાદિયોગૈર્ભગવાનુમાપતિઃ ॥ ૨.૨૭॥

સુખાભિધાનાત્સુખમેવ શમ્ભુઃ કં બ્રહ્મ ખં બ્રહ્મ ઇતિ શ્રુતીરિતઃ ।
શ્રુતોપવાક્યોપનિષત્પ્રચોદિતઃ ગતિં પ્રપદ્યેત બુધોઽપિ વિદ્યયા ॥ ૨.૨૮॥

અનવસ્થિતિતોઽપિ નેતરો ભગવાનેવ સ ચક્ષુષિ પ્રબુધ્યેત્ ।
ભયભીતાઃ ખલુ યસ્ય સોમસૂર્યાનલવાય્વમ્બુજસમ્ભવા ભ્રમન્તિ ॥ ૨.૨૯॥

અન્તર્યામિતયૈવ લોકમખિલં જાનાત્યુમાયાઃ પતિઃ ।
ભૂતેષ્વન્તરગોઽપિ ભૂતનિવહા નો જાનતે શઙ્કરમ્ ॥ ૨.૩૦॥

ન તત્સ્મૃત્યા ધર્મૈરભિલષણતો ભેદવિધુરં
ન શારીરં ભેદે (ભેદ) ભવતિ અગજાનાયકવરે ।
અદૃશ્યત્વાદ્ધર્મૈર્ન ખલુ ભગવાનન્યદિતિ ચ
પરાદાદિત્યં ચામતિરપિ ચ ભેદપ્રકલને ॥ ૨.૩૧॥

ભેદાદેશ્ચ વિશેષણં પરશિવે રૂપં ન નામ પ્રભા ।
ભાવો વા ભવતિ પ્રભાવિરહિતં બ્રહ્માત્મના ચાહ તત્ ॥ ૨.૩૨॥

સ્મૃતં માનં શમ્ભૌ ભગવતિ ચ તત્સાધનતયાપ્યતો
    દૈવં ભૂતં ન ભવતિ ચ સાક્ષાત્પરશિવે ।
અભિવ્યક્તી ચાન્યઃ સ્મૃતિમપિ તથાઽન્યોઽપિ મનુતે તથા
    સમ્પત્તિર્વૈ ભુવિ ભવતિ કિં શમ્ભુકલને ॥ ૨.૩૩॥

યં મુક્તિવ્યપદેશતઃ શ્રુતિશિખાશાખાશતૈઃ કલ્પિતે
    ભિદ્યેદ્ગ્રન્થિરપિ પ્રકીર્ણવચનાત્સાક્ષ્યેવ બાહ્યાન્તરા ।
શબ્દો બ્રહ્મતયૈવ ન પ્રભવતે પ્રાણપ્રભેદેન ચ
    તચ્ચાપ્યુત્ક્રમણસ્થિતિશ્ચ વિલયે ભુઙ્ક્તેઽપ્યસૌ (ભુઙ્ક્ત્યેઽપ્યસૌ) શઙ્કરઃ ॥ ૨.૩૪॥

તં ભૂમા સમ્પ્રસાદાચ્છિવમજરમાત્માનમધુના
    શ‍ૃણોતીક્ષેદ્વાપિ ક્ષણમપિ તથાન્યં ન મનુતે ।
તથા ધર્માપત્તિર્ભવતિ પરમાકાશજનિતં
    પ્રશસ્તં વ્યાવૃત્તં દહરમપિ દધ્યાદ્યપદિશત્ ॥ ૨.૩૫॥

અલિઙ્ગં લિઙ્ગસ્થં વદતિ વિધિવાક્યૈઃ શ્રુતિરિયં
    ધૃતેરાકાશાખ્યં મહિમનિ પ્રસિદ્ધેર્વિમૃશતા ।
અતો મર્શાન્નાયં ભવતિ ભવભાવાત્મકતયા
    શિવાવિર્ભાવો વા ભવતિ ચ નિરૂપે ગતધિયામ્ ॥ ૨.૩૬॥

પરામર્શે ચાન્યદ્ભવતિ દહરં કિં શ્રુતિવચો
    નિરુક્તં ચાલ્પં યત્ત્વનુકૃતિ તદીયેઽક્ષિ મહસા ।
વિભાતીદં શશ્વત્પ્રમતિવરશબ્દૈઃ શ્રુતિભવૈઃ ॥ ૨.૩૭॥

યો વ્યાપકોઽપિ ભગવાન્પુરુષોઽન્તરાત્મા ।
વાલાગ્રમાત્રહૃદયે કિમુ સન્નિવિષ્ટઃ ॥ ૨.૩૮॥

પ્રત્યક્ષાનુભવપ્રમાણપરમં વાક્યં કિલૈકાર્થદં
    માનેનાપિ ચ સમ્ભવાભ્રમપરો વર્ણં તથૈવાહ હિ ।
શબ્દઞ્ચાપિ તથૈવ નિત્યમપિ તત્સામ્યાનુપત્તિક્રિયા
    મધ્વાદિષ્વનધીકૃતોઽપિ પુરુષો જ્યોતિષ્યભાવો (જ્યોતિષ્ટ્રભાવો) ભવેત્ ॥ ૨.૩૯॥

ભાવઞ્ચાપિ શુગસ્ય તચ્છ્રવણતો જાત્યન્તરાસમ્ભવા-
    ત્સંસ્કારાધિકૃતોઽપિ શઙ્કરપદં યે વક્તુકામા (યો વક્તુકામો) મનાક્ ।
જ્યોતિર્દર્શનતઃ પ્રસાદપરમાદસ્માચ્છરીરાત્પર-
    ઞ્જ્યોતિશ્ચાભિનિવિશ્ય વ્યોમ પરમાનન્દમ્પરં વિન્દતિ ॥ ૨.૪૦॥

સ્મૃતીનાં વાદોઽત્ર શ્રુતિવિભવદોષાન્યવચસા
    સ એવાત્મા દોષૈર્વિગતમતિકાયઃ પરશિવઃ ।
સ વિશ્વં વિશ્વાત્મા ભવતિ સ હિ વિશ્વાધિકતયા
    સમસ્તેષુ પ્રોતો ભવતિ સ હિ કાર્યેષુ કરણમ્ ॥ ૨.૪૧॥

પ્રધાનાનાન્તેષાં ભવતિ ઇતરેષામનુપમો-
    ઽપ્યલબ્ધોઽપ્યાત્માયં શ્રુતિશિરસિ ચોક્તોઽણુરહિતઃ ।
સ દૃશ્યોઽચિન્ત્યાત્મા ભવતિ વરકાર્યેષુ કરણં
    અસદ્વા સદ્વા સોઽપ્યસદિતિ ન દૃષ્ટાન્તવશગમ્ ॥ ૨.૪૨॥

અસઙ્ગો લક્ષણ્યઃ સ ભવતિ હિ પઞ્ચસ્વપિ મુધા
    અભીમાનોદ્દેશાદનુગતિરથાક્ષાદિરહિતઃ ।
સ્વપક્ષાદૌ દોષાશ્રુતિરપિ ન ઈષ્ટે પરમતં
    ત્વનિર્મોક્ષો ભૂયાદનુમિતિકુતર્કૈર્ન હિ ભવેત્ ॥ ૨.૪૩॥

ભોક્ત્રાપત્તેરપિ વિષયતો લોકવેદાર્થવાદો નૈનં
    શાસ્તિ પ્રભુમતિપરં વાચિ વારમ્ભણેભ્યઃ (વા વિચારમ્ભણેભ્યઃ) ।
ભોક્તા ભોગવિલક્ષણો હિ ભગવાન્ ભાવોઽપિ લબ્ધો ભવે-
    ત્સત્ત્વાચ્ચાપિ પરસ્ય કાર્યવિવશં સદ્વાક્યવાદાન્વયાત્ ॥ ૨.૪૪॥

યુક્તેઃ શબ્દાન્તરાચ્ચાસદિતિ ન હિ કાર્યં ચ કરણં
    પ્રમાણૈર્યુક્ત્યા વા ન ભવતિ વિશેષેણ મનસા ।
પરઃ પ્રાણોદ્દેશાદ્ધિતકરણદોષાભિધધિયા
    તથાશ્માદ્યા દિવ્યા ??? દ્યોતન્તિ દેવા દિવિ ॥ ૨.૪૫॥

પ્રસક્તિર્વા કૃત્સ્ના શ્રુતિવરબલાદાત્મનિ ચિરં
    સ્વપક્ષે દોષાણાં પ્રભવતિ ચ સર્વાદિસુદૃશા ।
વિકારાણાં ભેદો ન ભવતિ વિયોજ્યો ગુણધિયાં
    અતો લોકે લીલાપરવિષમનૈર્ઘૃણ્યવિધુરમ્ ॥ ૨.૪૬॥

સ કર્મારમ્ભાદ્વા ઉપલભતિ યદ્યેતિ ચ પરં
સર્વૈર્ધર્મપદૈરયુક્તવચનાપત્તેઃ પ્રવૃત્તેર્ભવેત્ ।
ભૂતાનાં ગતિશોપયુજ્યપયસિ ક્ષારં યથા નોપયુકવસ્થાનં નૈવ પ્રભવતિ
તૃણેષૂદ્યતમતેસ્તથાભાવાત્પુંસિ પ્રકટયતિ કાર્યં ચ કરણમ્ ॥ ૨.૪૭॥

અઙ્ગિત્વાનુપપત્તિતોઽપ્યનુમિતો શક્તિજ્ઞહીનં જગત્-

પ્રતિષિદ્ધે સિદ્ધે પ્રસભમિતિ મૌનં હિ શરણમ્ ।
મહદ્દીર્ઘં હ્રસ્વમુભયમપિ કર્મૈવ કરણે તથા
સામ્યે સ્થિત્યા પ્રભવતિ સ્વભાવાચ્ચ નિયતમ્ ॥ ૨.૪૮॥

ન સ્થાનતોઽપિ શ્રુતિલિઙ્ગસમન્વયેન
પ્રકાશવૈયર્થ્યમતો હિ માત્રા ।
સૂર્યોપમા પ્રભવતિત્વતથા ઉદત્વા- (સૂર્યોપમા પ્રભતિ ચત્વતથામ્બુદત્વા)
ત્તદ્દર્શનાચ્ચ નિયતં પ્રતિબિમ્બરૂપમ્ ॥ ૨.૪૯॥

તદવ્યક્તં ન તતો લિઙ્ગમેતત્તથોભયવ્યપદેશાચ્ચ તેજઃ ।
પ્રતિષેધાચ્ચ પરમઃ સેતુરીશઃ સામાન્યતઃ સ્થાનવિશેષબુદ્ધ્યા ॥ ૨.૫૦॥

વિશેષતશ્ચોપપત્તેસ્તથાન્યદતઃ ફલઞ્ચોપપદ્યેત યસ્માત્ ।
મહેશ્વરાચ્છ્રુતિભિશ્ચોદિતં યદ્ધર્મં પરે ચેશ્વરં ચેતિ ચાન્યે ।
ન કર્મવચ્ચેશ્વરે ભેદધીર્નઃ ॥ ૨.૫૧॥

ભેદાન્ન ચેતિ પરતઃ પરમાર્થદૃષ્ટ્યા સ્વાધ્યાયભેદાદુપસંહારભેદઃ ।
અથાન્યથાત્વં વચસોઽસૌ વરીયાન્સંજ્ઞાતશ્ચેદ્વ્યાપ્તિરેવ પ્રમાણમ્ ॥ ૨.૫૨॥

સર્વત્રાભેદાદનયોસ્તથાન્યત્પ્રાધાન્યમાનન્દમયઃ શિરસ્ત્વમ્ ।
તથેતરે ત્વર્થસામાન્યયોગાત્પ્રયોજનાભાવતયાઽપ્યયાય તે ॥ ૨.૫૩॥

શબ્દાત્તથા હ્યાત્મગૃહીતિરુત્તરાત્તથાન્વયાદિતરાખ્યાનપૂર્વમ્ ।
અશબ્દત્વાદેવમેતત્સમાનમેવઞ્ચ સંવિદ્વચનાવિશેષાત્ ॥ ૨.૫૪॥

તદ્દર્શનાત્સમ્ભૃતઞ્ચૈવમેષોઽનામ્નાયાદ્વેદ્યભેદાત્પરેતિ ।
ગતેરર્થાદુપપન્નાર્થલોકે શબ્દાનુમાનૈઃ સગુણોઽવ્યયાત્મા ॥ ૨.૫૫॥

યથાધિકારં સ્થિતિરેવ ચાન્તરા (તથાત્મનઃ) તત્રૈવ ભેદાદ્વિશિષન્હીતરવત્ ।
અન્યત્તથા સત્યકૃત્યા તથૈકે કામાદિરત્રાયતનેષુ ચાદરાત્ ॥ ૨.૫૬॥

ઉપસ્થિતે તદ્વચનાત્તથાગ્નેઃ સંલોપ એવાગ્નિભવઃ પ્રદાને ।
અતોઽન્યચિન્તાર્થભેદલિઙ્ગં બલીયઃ ક્રિયા પરં ચાસમાનાચ્ચ દૃષ્ટેઃ ॥ ૨.૫૭॥

શ્રુતેર્બલાદનુબન્ધેમખે વૈ ભાવાપત્તિશ્ચાત્મનશ્ચૈક એવ ।
તદ્ભાવભાવદુપલબ્ધિરીશે સદ્ભાવભાવાદનુભાવતશ્ચ ॥ ૨.૫૮॥

અઙ્ગાવબદ્ધા હિ તથૈવ મન્ત્રતો ભૂમ્નઃ ક્રતોર્જાયતે દર્શનેન ॥ ૨.૫૯॥

રૂપાદેશ્ચ વિપર્યયેણ તુ દૃશા દોષોભયત્રાપ્યયં

અગ્રાહ્યાઃ સકલાનપેક્ષ્યકરણં પ્રાધાન્યવાદેન હિ ।
તત્પ્રાપ્તિઃ સમુદાયકેઽપિ ઇતરે પ્રત્યાયિકેનાપિ ય-
દ્વિધાઽવિધા અસતિ બલતો ધુર્યમાર્યાભિશંસી ॥ ૨.૬૦॥

દોષોભયોરપિ તદા સ્વગમોઽભ્યુપેયા ।
સ્મૃત્યા સતો દૃશિ ઉદાસીનવદ્ભજેત ॥ ૨.૬૧॥

નાભાવાદુપલબ્ધિતોઽપિ ભગવદ્વૈધર્મ્યસ્વન્યાદિવ-
તદ્ભાવેનાપ્યુપલબ્ધિરીશિતુરહો સા વૈ ક્ષણં કલ્પ્યતે ।
સર્વાર્થાનુપપત્તિતોઽપિ ભગવત્યેકાદ્વિતીયે પુનઃ ।
કાર્ત્સ્ન્યેનાત્મનિ નો વિકારકલનં નિત્યં પતેર્ધર્મતઃ ॥ ૨.૬૨॥

સમ્બન્ધાનુપપત્તિતોઽપિ સમધિષ્ઠાનોપપત્તેરપિ
તચ્ચૈવાકરણં ચ ભોગવિધુરં ત્વં તત્ત્વસર્વજ્ઞતા ।
ઉત્પત્તેરપિ કર્તુરેવ કારણતયા વિજ્ઞાનભાવો યદિ
??? નિષેધપ્રતિપત્તિતોઽપિ મરુતશ્ચાકાશતઃ પ્રાણતઃ ॥ ૨.૬૩॥

અસ્તિત્વં તદપીતિ ગૌણપરતા વાક્યેષુ ભિન્ના ક્રિયા
કાર્યદ્રવ્યસમન્વયાયકરણં શબ્દાચ્ચ બ્રહ્મૈવ તત્ ।
શબ્દેભ્યોઽપ્યમતં શ્રુતં ભવતિ તજ્જ્ઞાનં પરં શામ્ભવં
યાવલ્લોકવિભાગકલ્પનવશાદ્ભૂતક્રમાત્સર્જતિ ॥ ૨.૬૪॥

તસ્યાસમ્ભવતો ભવેજ્જગદિદં તેજઃપ્રસૂતં શ્રુતિઃ ।
ચાપઃ ક્ષ્મા મરુદેવ ખાત્મકથયન્તલ્લિઙ્ગસંજ્ઞાનતઃ ॥ ૨.૬૫॥

વિપર્યયેણ ક્રમતોઽન્તરા હિ વિજ્ઞાનમાનક્રમતો વિશેષાત્ ।
ન ચાત્મનઃ કારણતાવિપર્યશ્ચરાચરવ્યાપકતો હિ ભાવૈઃ ॥ ૨.૬૬॥

નાત્મા શ્રુતો નિત્યતાશક્તિયોગાન્નાનેવ ભાસત્યવિકલ્પકો હિ ।
સંજ્ઞાન એવાત્ર (સન્તાન એવાત્ર) ગતાગતાનાં સ્વાત્માનં ચોત્તરણેનાણુરેવ ॥ ૨.૬૭॥

સ્વશબ્દોન્માનાભ્યાં સુખયતિ સદાનન્દનતનું
વિરોધશ્ચાન્દ્રોપદ્રવ ઇવ સદાત્મા નિખિલગઃ ।
ગુણાદાલોકેષુ વ્યતિકરવતો ગન્ધવહતઃ
પરો દૃષ્ટો હ્યાત્મા વ્યપદિશતિ પ્રજ્ઞાનુભવતઃ ॥ ૨.૬૮॥

યાવચ્ચાત્મા નૈવા દૃશ્યેત દોષૈઃ પુંસ્ત્વાદિવત્ત્વસતો વ્યક્તિયોગાત્ ।
મનોઽન્યત્રાયદિ કાર્યેષુ ગૌણં વિમુખઃ કર્તા

શાશ્વતો વિહરતિ ઉપાદાનવશતઃ ॥ ૨.૬૯॥

અસ્યાત્મવ્યપદેશતઃ શ્રુતિરિયં કર્તૃત્વવાદં વદ-
તુપાલબ્ધું શક્તેર્વિપરતિ સમાધ્યા (વિપર્યે સમાધ્યા) ક્ષુભિતયા ।
પરાત્તત્તુ શ્રુત્યાપ્યનુકૃતિ સુરત્વક્ષુભિતયા (સુયત્નક્ષુભિતયા)
પરો મન્ત્રો વર્ણૈર્ભગવતિ અનુજ્ઞાપરિહરૌ ।
તનોઃ સમ્બન્ધેન પ્રવિશતિ પરં જ્યોતિકલને ॥ ૨.૭૦॥

આસન્નતેવ્યતિકરં પરરૂપભેદે આભાસ એવ સુદૃશા નિયતો નિયમ્યાત્ ।
આકાશવત્સર્વગતોઽવ્યયાત્મા આસન્ધિભેદાત્પ્રતિદેશભાવાત્ ॥ ૨.૭૧॥

તથા પ્રાણો ગૌણઃ પ્રકૃતિવિધિપૂર્વાર્થકલના-
દધસ્તોયે સૃત્યઃ પ્રથિતગતિશેષેણ કથિતઃ ।
હસ્તાદયસ્ત્વણવઃ પ્રાણવાયોઃ ચક્ષુસ્તથા કરણત્વાન્ન દોષઃ ॥ ૨.૭૨॥

યઃ પઞ્ચવૃત્તિર્મનવચ્ચ દૃશ્યતે તથાણુતો જ્યોતિરસુશ્ચ ખાનિ ।
ભેદશ્રુતેર્લક્ષણવિપ્રયોગાદાત્માદિભેદે તુ વિશેષ વાદઃ ॥ ૨.૭૩॥

આત્મૈકત્વાત્પ્રાણગતેશ્ચ વહ્નેઃ તે જાગતીવાશ્રુતત્ત્વાન્ન ચેષ્ટા ।
ભોક્તુર્ન ચાત્મન્યવિદીકૃતા યે તે ધૂમમાર્ગેણ કિલ પ્રયાન્તિ ॥ ૨.૭૪॥

ચરણાદિતિ ચાન્યકલ્પનાં સ્મરન્તિ સપ્તૈવ ગતિપ્રરોહાત્ ।
વ્યાપારવૈધુર્યસમૂહવિદ્યા તે કર્મણૈવેહ તૃતીયલબ્ધામ્ ॥ ૨.૭૫॥

તદ્દર્શનન્તદ્વદતોઽપ્યવિદ્યા સવ્યોપપત્તેરુત દૌવિશેષાત્ ।
ચિરન્તપઃ શુદ્ધિરતો વિશેષાત્તે સ્થાવરે ચાવિશેષાર્થવાદઃ ॥ ૨.૭૬॥

સન્ધ્યાંશસૃષ્ટ્યા કિલ નિર્મમે જગત્પુત્રેષુ માયામયતોઽવ્યયાત્મા ।
કૃત્સ્નં માયામયં તજ્જગદિદમસતો નામરૂપં તુ જાતમ્ ।
જાગ્રત્સ્વપ્નસુષુપ્તિતોઽપિ પરમાનન્દમ્તિરોધાનકૃત્ ॥ ૨.૭૭॥

દેહયોગાગ્રસતે વર્ધતે યઃ તત્રૈવાન્યત્પશ્યતે સોઽથ બોધાત્ ।
સ શોશુચાનસ્મૃતિશબ્દબોધઃ ॥ ૨.૭૮॥

નાનાશબ્દાદિભેદાત્ફલવિવિધમહાકર્મવૈચિત્ર્યયોગા-
દીષ્ટેતાં ગુણધારણાં શ્રુતિહિતાં તદ્દર્શનોદ્બોધતઃ ।
તદ્દર્શનાત્સિદ્ધિત એવ સિદ્ધ્યતે આચારયોગાદૃતતચ્છ્રુતેશ્ચ ॥ ૨.૭૯॥

વાચા સમારમ્ભણતો નિયામતઃ તસ્યાધિકાપ્રાત્વકસ્યોપદેશાત્ ।

તુલ્યન્દૃશા સર્વતઃ સ્યાદ્વિભાગઃ અધ્યાપયાત્રાન્નવિશેષતસ્તુ તે ॥ ૨.૮૦॥

કામોપમર્દેન તદૂર્ધ્વરેતસા વિમર્શતો યાતિ સ્વતત્ત્વતોઽન્યઃ ।
અનુષ્ઠેયં ચાન્યત્શ્રુતિશિરસિ નિષ્ઠાભ્રમવશાત્ ।
વિધિસ્તુત્યા ભાવમ્પ્રવદતિ રથાગ્નેરાધાનમનુવદતિ જ્ઞાનાઙ્ગમપિ ચ ॥ ૨.૮૧॥

પ્રાણાત્યયે વાપિ સમન્તથાન્નમબાધતઃ સ્મૃતિતઃ કામકારે ।
વિહિતાશ્રમકર્મતઃ સહૈવ કાર્યાત્તથોભયોર્લિઙ્ગભઙ્ગં ચ દર્શયેત્ ॥ ૨.૮૨॥

તથાન્તરા ચાપિ સ્મૃતેર્વિશેષતઃ જ્યાયોઽપિ લિઙ્ગાભયભાવનાધિકા ।
સૈવાધિકારાદર્શનાત્તદુક્તમાચારતઃ સ્વામિન ઈજ્યવૃત્ત્યા ॥ ૨.૮૩॥

સ્મૃતે ઋત્વિક્સહકાર્યં ચ કૃત્સ્નમ્ ।
તન્મૌનવાચા વચનેન કુર્વન્તદૈહિકમ્તદવસ્થાધૃતેશ્ચ ॥ ૨.૮૪॥

આવૃત્ત્યાપ્યસકૃત્તથોપદિશતિ હ્યાત્મન્નુપાગચ્છતિ
ગ્રાહં યાતિ ચ શાસ્ત્રતો પ્રતીકકલનાત્સા બ્રહ્મદૃષ્ટિર્પ્રભોઃ ।
આદિત્યાદિકૃતીષુ તથા સતીરપિ કર્માઙ્ગતાધ્યાનતઃ
તસ્માચ્ચાસ્થિરતાં સ્મરન્તિ ચ પુનર્યત્રૈવ તત્ર શ્રુતા ॥ ૨.૮૫॥

આપ્રાયણાત્તત્ર દૃષ્ટં હિ યત્ર તત્રાગમાત્પૂર્વયોઽશ્લેષનાશૌ ।
તથેતરસ્યાપિ પતેદસંસૃતૌ અનારબ્ધાગ્નિહોત્રાદિકાર્યે ॥ ૨.૮૬॥

અતોઽન્યેષામુભયોર્યત્ર યોગાદ્વિદ્યાભોગેન વાઙ્મનસી દર્શનાચ્ચ ।
સર્વાણ્યનુમનસા પ્રાણ એવ સોઽધ્યક્ષેત ઉપદર્શેન કશ્ચિત્ ॥ ૨.૮૭॥

સમાનવૃત્ત્યા ક્રમતે ચાસુ વૃત્ત્યા સંસારતો વ્યપદેશોપપત્તેઃ ।
સૂક્ષ્મપ્રમાણોપમર્દોપલબ્ધસ્થિતિશ્ચ તથોપપત્તેરેષ ઊષ્મા રસૈકે ॥ ૨.૮૮॥

અત્ર સ્મર્યનાનુપરતાવિધિવાક્યસિદ્ધેર્વૈયાસકિર્મુનિરેષોવ્યયાત્મા ।
અવિભાગો વચનાદ્ધાર્દ એવ રશ્મ્યનુસારી નિશિતો દક્ષિણાયને ।
યોગિનઃ પ્રતિસૃતૈસ્તથાર્ચિરાદ્વાયુમદ્ઘટિતો વરુણેન ॥ ૨.૮૯॥

અતિવાહિકવિધેસ્તદલિઙ્ગાત્તદ્વદત્રોભયોરપિ સિદ્ધિઃ ।
તદ્વૈતેન ગતિરપ્યુપાવૃતો વિશેષસામીપ્યસકાર્યહેતૌ ॥ ૨.૯૦॥

સ્મૃતિસ્તથાઽન્યોઽપિ ચ દર્શનેન કાયે તથા પ્રતિપત્તિપ્રતીકઃ ।
વિશેષદૃષ્ટ્યા સમ્પદાવિર્ભવેન સ્વેનાંશત્વાન્મુક્તિવિજ્ઞાનતો હિ ॥ ૨.૯૧॥

આત્મપ્રકાશાદવિભાગેન દૃષ્ટઃ તદ્બ્રહ્મણોઽન્યદ્દ્યુતિતન્માત્રતોઽન્યઃ ।

ઉપન્યાસાદન્યસઙ્કલ્પભૂત્યા રથવાન્યોઽપ્યુથાહ ॥ ૨.૯૨॥

ભાવમન્યો ઉભયં ન સ્વભાવા ભાવે સમ્પત્તિરેવં (ભાવે સ્વાપ્યસમ્પત્તિરેવં) જગત્સ્યાત્ ।
પ્રત્યક્ષેણોપદેશાત્સ્થિતિરપિ જગતો (સ્થિતિરવિનૃષરાવર્તિ) વ્યક્તિભાવાદુપાસા
ભેદાભાસસ્થિતિરવિકારાવર્તિરિતિ ચ ॥ ૨.૯૩॥

તથા દૃષ્ટેર્દ્રષ્ટુર્વિપરીતદૃષ્ટેઃ શ્રુતિવશાત્તથા
બુદ્ધેર્બોદ્ધા ભવતિ અનુમાનેન હિ બુધઃ ।
ભોગે સામાન્યલિઙ્ગાચ્છિવભજનભવે માન્યમનસા
અનાવૃત્તિઃ શબ્દો ભવતિ વિધિવાક્યેન નિયતમ્ ॥ ૨.૯૪॥

તવોક્તઃ સૂત્રાણાં વિધિરપિ ચ સામાન્યમુભય-
પ્રકૃષ્ટ શ્રુત્યૈવ પ્રભવતિ મહાનન્દસદને ॥ ૨.૯૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવેન ઋભું પ્રતિ સૂત્રોપદેશઃ સમ્પૂર્ણઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૨ । ૧-૯૫॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 2 . 1-95..

Notes :

Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Shivena Ribhum Prati Sutropadeshah*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*